# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा – अक्टूबर, २०१९

कक्षा – शास्त्रितृतीयवर्षम् (SEM-५) **प्रश्नपत्रम् – 7** गुणाः - ७०

विषयः – वेद **कोड – CE-3.5.5** समयः – ३.०० तः ६.००

दिनाङ्कः – १६/१०/२०१९ सन्दर्भग्रन्थः – शतपथब्राह्मणम्

---

### प्रथमान्वितिः (Unit-1)

**प्रश्नः – १ अधोलिखितेषु प्रश्नेषु कयोश्चिद् द्वयोः व्याख्यां लिखत।** १०

(१)अमेध्यो वै पुरुषो यदनृतं वदति, तेन पूतिरन्तरत:।
मेध्या वा आप: , मेध्यो भूत्वा व्रतमुपायानीति॥

(२) यज्ञो वै कर्म, यज्ञाय हि। तस्मादाह- कर्मणे वामिति।

(३) पवित्रे करोति – पवित्रे स्थो वैष्णव्यौ इति।

**प्रश्नः – २ निम्नलिखितयोः कस्यचिद् एकस्य निबन्धात्मकम् उत्तरं लिखत।** १०

(१) ग्रन्थदिशा हविग्रहणविधिं समन्त्रकं प्रतिपादयत।

(२) यथाशास्त्रम् अपां प्रणयनविधिं विवेचयत।

### द्वितीयान्वितिः (Unit-2)

**प्रश्नः – ३ अधोलिखितेषु प्रश्नेषु कयोश्चिद् द्वयोः व्याख्यां लिखत।** १०

(१) श्रद्धादेवो वै मनु: - आवं नु वेदावेति।

(२) स वै कपालान्येवान्यतर उपदधाति, दृशदुपले अन्यतरः।
तद्वा एतदुभयं सह क्रियते॥

(३) अवधूतं रक्षोऽवधूता अरातय:। अदित्यास्त्वगसि
प्रतित्वादितिर्वेत्तु।

**प्रश्नः – निम्नलिखितयोः कस्यचिद् एकस्य निबन्धात्मकम् उत्तरं लिखत।** १०

४

(१)कपालोपधानविधानं यथाशास्त्रं वर्णयत।

(२) हविनिष्पादनविधिविषये यथाशास्त्रं लिखत।

## तृतीयान्वितिः (Unit-3)

**प्रश्नः – ५ अधोलिखितेषु द्वयोः श्लोकयोः व्याख्यात्मकम् उत्तरं लिख्यताम्।** १०

(१) यावती वेदि: तावती पृथिवी ।

(२) चतुर्धा विहितो ह वा अग्रेऽग्निरास।

(३) वज्रो वै स्फ्यः, ब्राह्मणश्च, इमं पुरा यज्ञमभ्यजूगुपताम्।

**प्रश्नः – ६ निम्नलिखितयोः कस्यचिद् एकस्य निबन्धात्मकम् उत्तरं लिखत।** १०

(१) यथाशास्त्रं स्तम्बयजुर्हरणविधिमाख्यायिकां च विशदयत।

(२)वेदिनिर्माणस्योपरि एकं निबन्धं लिखत।

**प्रश्नः – ७ अधोलिखितेषु केषाञ्चन दश प्रश्नानाम् अतिलघूत्तराणि लिखत।** १०

(१)व्रतग्रहणं क: करोति?

(२)हविग्रहणस्य मन्त्र: क: ?

(३)क: देवानां व्रतपति: ?

(४)काण्वशतपथब्राह्मणे कति काण्डानि सन्ति ?

(५)“अग्रेपुव:”- इति सम्बोधनपदं कस्य कृते प्रयुज्यते ?

(६)कत्यक्षरा वै विराट् ?

(७)शतपथब्राह्मणस्य सम्बन्ध: केन वेदेन सह वर्तते ?

(८)कृष्णमृगस्य यानि कृष्णानि तानि कस्य वेदस्य प्रतिनिधित्वं करोति ?

(९) उलूखलस्य स्थापनं केन मन्त्रेण करोति ?

(१०) अग्निसोमयो: कृते कति कपालानि भवन्ति ?

(११) मुसलस्य निर्माणं केन द्रव्येण भवति ?

(१२) हविष्कृत् आह्वाने ब्राह्मणस्य कृते क: विशेष: ?

(१३) कति परिधय: ?

(१४) आसादनपात्राणि कति ?

(१५) अग्निदेवस्य कति कपालानि ?

***

`**Answer Key**

| | | |
|---|---|---|
| कक्षा – शास्त्रितृतीयवर्षम् (SEM-५) | **प्रश्नपत्रम् – 7** | गुणाः - ७० |
| विषयः – वेद | **कोड – CE-3.5.5** | समयः – |
| दिनाङ्कः – | सन्दर्भग्रन्थः – शतपथब्राह्मणम् | |

**प्रश्नः – ७**

(१) व्रतग्रहणं क: करोति ? यजमानः सपत्नीकम्

(२)हविग्रहणस्य मन्त्र: क: ? अग्नये जुष्टं गृह्णामि, अग्निसोमाभ्यां त्वा जुष्टं गृह्णामि

(३)क: देवानां व्रतपति: ? अग्निः

(४)काण्वशतपथब्राह्मणे कति काण्डानि सन्ति ? सप्तदश

(५)“अग्रेपुव:”- इति सम्बोधनपदं कस्य कृते प्रयुज्यते ? जलस्य कृते

(६)कत्यक्षरा वै विराट् ? दशाक्षरा

(७)शतपथब्राह्मणस्य सम्बन्ध: केन वेदेन सह वर्तते ? शुक्लयजुर्वेदेन

(८)कृष्णमृगस्य यानि कृष्णानि तानि कस्य वेदस्य प्रतिनिधित्वं करोति ? यानि कृष्णानि तान्यृचाम्

(९)उलूखलस्य स्थापनं केन मन्त्रेण करोति ? अद्रिरसि वानस्पत्यो ग्रावासि पृथुबुध्नः

(१०) अग्निसोमयो: कृते कति कपालानि भवन्ति ? एकादश

(११) मुसलस्य निर्माणं केन द्रव्येण भवति ? वानस्पत्य

(१२) हविष्कृत् आह्वाने ब्राह्मणस्य कृते क: विशेष: ? हविष्कृदेहि

(१३) कति परिधय: ? तिस्रः

(१४) आसादनपात्राणि कति ? दश

(१५) अग्निदेवस्य कति कपालानि ? अष्ट